শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীমদ্রামাযণে ৱাল্মীকীযে

# ॥শ্রীগাযত্রীরামাযণম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীগাযত্রীরামাযণম্ ॥

তপসস্বাধ্যাযনিরতং তপস্বী ৱাগ্বিদাং ৱরম্।
নারদং পরিপপ্রচ্ছ ৱাল্মীকির্মুনিপুঙ্গৱম্॥ ১ ॥

স হত্বা রাক্ষসান্ সর্ৱান্ যজ্ঞঘ্নান্ রঘুনন্দনঃ।
ঋষিভিঃ পূজিতসসম্যগ্যথেন্দ্রো ৱিজযী পুরা॥ ২ ॥

ৱিশ্বামিত্রঃ স ধর্মাত্মা শ্রুত্বা জনকভাষিতম্।
ৱতস রাম ধনুঃ পশ্য ইতি রাঘৱমব্রৱীত্॥ ৩ ॥

তুষ্টাৱাস্য তদা ৱংশং প্রৱিশ্য স ৱিশাংপতেঃ।
শযনীযং নরেন্দ্রস্য তদাসাদ্য ৱ্যতিষ্ঠত॥ ৪ ॥

ৱনৱাসং হি সঙ্খ্যায ৱাসাংস্যাভরণানি চ।
ভর্তারমনুগচ্ছন্ত্যৈ সীতাযৈ শ্বশুরো দদৌ॥ ৫ ॥

রাজা সত্যং চ ধর্মশ্চ রাজা কুলৱতাং কুলম্।
রাজা মাতা পিতা চৈৱ রাজা হিতকরো নৃণাম্॥ ৬ ॥

নিরীক্ষ্য স মুহূর্তং তু দদর্শ ভরতো গুরুম্।
উটজে রামমাসীনং জটাৱল্কলধারিণম্॥ ৭ ॥

যদি বুদ্ধিঃ কৃতা দ্রষ্টুমগস্ত্যং তং মহামুনিম্।
অদ্যৈৱ গমনে বুদ্ধিং রোচযস্ব মহাযশঃ॥ ৮ ॥

ভরতস্যার্যপুত্রস্য শ্বশ্রূণাং মম চ প্রভো।
মৃগরূপমিদং ৱ্যক্তং ৱিস্মযং জনযিষ্যতি॥ ৯ ॥

গচ্ছ শীঘ্রমিতো রাম সুগ্রীৱং তং মহাবলম্।
ৱযস্যং তং কুরু ক্ষিপ্রং ইতো গত্বাদ্য রাঘৱ॥ ১০ ॥

দেশকালৌ প্রতীক্ষস্ব ক্ষমমাণঃ প্রিযাপ্রিযে।
সুখদুঃখসহঃ কালে সুগ্রীৱৱশগো ভৱ॥ ১১ ॥

prapatti dot com

ৱন্দ্যাস্তে তু তপসসিদ্ধাঃ তপসা ৱীতকল্মষাঃ।
প্ৰষ্টৱ্যাস্তেপি সীতাযাঃ প্ৰৱৃত্তিং ৱিনযান্বিতৈঃ॥ ১২ ॥

স নির্জিত্য পুরীং শ্ৰেষ্ঠাং লঙ্কাং তাং কামরূপিণীম্।
ৱিক্ৰমেণ মহাতেজা হনুমান্ মারুতাত্মজঃ॥ ১৩ ॥

ধন্যা দেৱাসস গন্ধৰ্ৱাঃ সিদ্ধাশ্চ পরমৰ্ষযঃ।
মম পশ্যন্তি যে নাথং রামং রাজীৱলোচনম্॥ ১৪ ॥

মঙ্গলাভিমুখী তস্য সা তদাসীন্মহাকপেঃ।
উপতস্থে ৱিশালাক্ষী প্ৰযতা হৱ্যৱাহনম্॥ ১৫ ॥

হিতং মহার্থং মৃদুপূৰ্ৱসংহিতম
    ৱ্যতীত কালাযতি সংপ্ৰতিক্ষমম্।
নিশম্য তদ্বাক্যমুপস্থিতজ্বরঃ
    প্ৰসঙ্গৱান্ উত্তরমেতদব্ৰৱীত্॥ ১৬ ॥

ধর্মাত্মা রক্ষসাং শ্ৰেষ্ঠঃ সংপ্ৰাপ্তোযং ৱিভীষণঃ।
লঙ্কৈশ্বৰ্যং ধ্ৰুৱং শ্ৰীমানযং প্ৰাপ্নোত্যকণ্টকম্॥ ১৭ ॥

যো ৱজ্ৰপাতাশনিসন্নিপাতাত
    ন চুক্ষুভে নাপি চচাল রাজা।
স রামবাণাভিহতো ভৃশার্তঃ
    চচাল চাপং চ মুমোচ ৱীরঃ॥ ১৮ ॥

যস্য ৱিক্ৰমমাসাদ্য রাক্ষসা নিধনং গতাঃ।
তং মন্যে রাঘৱং ৱীরং নারাযণমনামযম্॥ ১৯ ॥

ন তে দদৃশিরে রামং দহন্তমরিৱাহিনীম্।
মোহিতাঃ পরমাস্ত্ৰেণ গান্ধৰ্ৱেণ মহাত্মনা॥ ২০ ॥

প্ৰণম্য দেৱতাভ্যশ্চ ব্ৰাহ্মণেভ্যশ্চ মৈথিলী।
বদ্ধাঞ্জলিপুটা চেদমুৱাচাগ্নি সমীপতঃ॥ ২১ ॥

চলনাতপৰ্ৱতেন্দ্ৰস্য গণা দেৱাশ্চ কংপিতাঃ।
চচাল পাৰ্ৱতী চাপি তদাশ্লিষ্টা মহেশ্বরম্॥ ২২ ॥

দাৰাঃ পুত্ৰাঃ পুৰং ৰাষ্ট্ৰং ভোগাচ্ছাদন ভাজনম্।
সৰ্ৱমেৱাৱিভক্তং নো ভৱিষ্যতি হৰীশ্বৰঃ॥ ২৩ ॥

যামেৱ ৰাত্ৰিং **শত্ৰুঘ্নঃ** পৰ্ণশালাং সমাৱিশত্।
তামেৱ ৰাত্ৰিং সীতাপি প্ৰসূতা দাৰকদ্বযম্॥ ২৪ ॥

ইদং ৰামাযণং কৃতস্নং গাযত্ৰীবীজসংযুতম্।
ত্ৰিসন্ধ্যং যঃ পঠেন্নিত্যং সৰ্ৱপাপৈঃ প্ৰমুচ্যতে॥ ২৫ ॥

॥ ইতি শ্ৰীগাযত্ৰীৰামাযণং সমাপ্তম্॥

prapatti dot com